सामु० श्रीगणेशायनमः आदिदेवंप्रणम्यादौ सर्वज्ञंसर्वदर्शिनं सामुद्रिकंप्रवक्ष्यामिशुभंगंपुरु
१ षस्त्रियः १ पूर्वमायुः परीक्षेतपश्चाल्लक्षणमेवच आयुर्हीनानरोनार्योलक्षणैःकिंप्रयोजनं
वामहस्तेतुनारीणांदक्षिणेपुरुषस्यच निर्दिष्टंलक्षणंतेषांसमुद्रवचनंयथा ३ स्थूलाशिरोग
णा४ध्यक्षंमूर्ध्नीस्थितमुदग्युतं ततोपरिमितेद्वालमात्रेपातलमस्तकं तिर्यगूर्ध्वसमोमानो
योष्टोत्तरशतांगुलः सभवेत्पृथिवीपालोजायतेनात्रसंशयः अधमेनवतिःप्रोक्तंमध्यमस्य
शतांगुलं अष्टोत्तरशतंयस्यउत्तमस्यचलक्षणं ६ अथलक्षणानि पंचदीर्घंचतुर्ह्रस्वंचतुः
सूक्ष्मंषडुन्नतं सप्तरक्तंत्रिगंभीरंत्रिविस्तीर्णंप्रशस्यते बाहुनेत्रांतरंचैवजानुनासानथैव
च स्तनयोरंतरंचैवपंचदीर्घंप्रशस्यते ग्रीवाप्रजननंपृष्ठंह्रस्वंजंघानथैवच ह्रस्वानियां
स्यचत्वारिपूजामाप्नोतिनिश्चयः सूक्ष्माण्यंगुलिपर्वाणिकेशाश्चदशनानखाः चतुःसूक्ष्मा
णिचैषांचतेनरादीर्घजीविनः कक्षाकुक्षिश्चवक्षश्चघ्राणंस्कंधललाटिका सर्वभूतेषुनिर्दि
ष्टंषडुन्नतंप्रशस्यते पाणिपादतलौरक्तौनेत्रांतानिनखानिच तालुजिह्वाधरोष्ठौचसप्तर
क्तंप्रशस्यते स्वरःसत्वंचनाभिंचत्रिगंभीरंप्रशस्यते उरःशिरोललाटंचत्रिविस्तीर्णंप्रशस्यते ११

१

एवंद्वात्रिंशल्लक्षणानि ७ वर्णाद्दूरतरंस्नेहंस्नेहाद्दूरतरंस्वरं स्वराद्दूरतरंसत्वंसर्वंसत्वेप्रतिष्ठितं
सत्वाधिकस्तस्यदयास्थिरत्वंशांत्यार्जवंब्राह्मणदेवभक्तिः रजोधिकःकाव्यकलाकुतूहलीसंसक्तचि
त्तःपुरुषोतिशूरः १५ तमोधिकोवंचयितापरेषांलुब्धोरलसःक्रोधपरोतिनिद्रः अतिह्रस्वोति
दीर्घश्चअतिस्थूलोतिरेतथा अतिकृष्णोतिगौरश्चषट्सत्वंनविद्यते मुखमर्धंशरीरस्यसर्वं
वामुखमुच्यते तत्रापिनासिकाश्रेष्ठाश्रेष्ठेतत्रापिचक्षुषी नश्रीस्त्यजतिरक्ताक्षंनार्थःकनक
पिंगलं दीर्घबाहुंनचैश्वर्यंनमांसोपचितंसुखं १८ श्रीमान्भवतिरक्ताक्षोह्यमर्त्यःकृष्णपिं
गलः दीर्घबाहुंतथैश्वर्यंसंपुमान्सुखमेधते उरोविशालोधनधान्यभोगीशिरोविशालोनृ
पपुंगवश्च कटिर्विशालोबहुपुत्रदारोविशालपादोसततंसुखीच २० वक्षःस्नेहेनसौभा
ग्यंदंतस्नेहेनभोजनं नेत्रस्नेहेनचशय्यांचपादस्नेहेनवाहनं अकर्मकठिणौहस्तौपादौच
ध्वनिकोमलौ यस्यपादौचपाणीचतस्यराज्यंविनिर्दिशेत् दीर्घलिंगेचदारिद्र्यंस्थूललिंगेननि
र्धनं कृष्णलिंगेनसौभाग्यंह्रस्वलिंगेनभूपतिं कनिष्ठांगुलिप्रदेशाद्रेखागच्छतितर्जनी अवि
च्छिन्नानिवर्षाणिशतमायुर्विनिर्दिशेत् २५ कनिष्ठांगुलिप्रदेशाद्रेखागच्छतिमध्यमा अविच्छि

२

सामु० न्यानिवर्षाणिअशीत्यायुर्विनिर्दिशेत् २५ कनिष्ठांगुलिप्रदेशाद्रेखागच्छत्यनामिकां अविछि
२ न्नानिवर्षाणिषष्टिमायुर्विनिर्दिशेत् रेखाभिर्बहुभिः क्लेशं स्वल्पाभिर्धनहीनता रेखाचतुष्टयं श्रेष्ठं
बहुरेखादरिद्रता अंगुष्ठोदरमध्यस्थो यवो यस्य विराजते उत्पन्नभक्षभोगी च स नरः सुखमेध
ते मत्स्यैः शतं विजानीयात्मकरैस्तु सहस्रकं शंखैः कोटिं विजानीयात्सद्मैः कोटिसहस्रकं अनामि
कापर्वयरास्थूलं घेककनिष्ठिकावर्षशतं स जीवति नवन्यूनमशीतिर्विगमे च सप्ततिस्तदर्धं नवेख
लुषष्ठिजीवति ललाटे यस्य तिस्रं तिरेखामेकसमाश्रिता विंशद्वर्षाणिजीवेत नारदस्य वचो यथा
ललाटे यस्य तिस्रं तिरेखाद्वयमनागता चत्वारिंशच्च जीवेत नारदस्य वचो यथा ललाटे यस्य दृश्यं
ते रेखात्रयमनागता षष्टिवर्षाणिनिर्दिष्टं विंशत्या द्वौ द्विरेखके ललाटे यस्य दृश्यंते शुभरेखाच
तुष्टयं अशीत्यायुर्विनिर्दिष्टं पंचरेखा शतं भवेत् अतिमेध्याविकीर्णिश्च विक्रांतातितथास्फुखी
अतिस्निग्धातिदृष्टश्च स नरोल्पायुषी भवेत् नित्यं छेदस्तृणानां भुविनखलिखनं पादयोरल्पशौ हेरंब
चं दंतानामल्पशौचं वसनमलिनता रुक्षता मूर्ध्वजानां द्वे संध्ये चातिनिद्रा विवसनशयनं ग्रासहासा
तिरेकः स्वांगे पीठे च वाद्यं निधनमुपनयत्येकेशवस्यापि लक्ष्मीः ३६ गोधस्वरो वा निगुरुपरिष्टा २



सामु० अंगुल्यापार्ष्णिवालेयासमुद्रवचनं यथा कुटिला विरला दीर्घा यस्यांगुल्यो भवंति च दुःखी भवति
३ नित्यं स धनहीनः सदा नरः १४ ५१ इति पुरुषलक्षणे पादांगुलीलक्षणं २ नखैः श्वेतैश्च वक्रैश्च
ते नरा दुःखभागिनः दुःशीला कुनखास्तथा कामभोगविवर्जिताः स्फाटितैर्वक्रितै रुक्षैर्नखैर्दारिद्र्यभा
ग्भवेत् हरिन्नीलानखाद्दंता ब्रह्महत्यां विनिर्दिशेत् इंद्रगोपकसंकाशैर्नखैर्भवति पार्थिवः
ताम्रैर्नखैस्तथैश्वर्यं गच्छत्यश्वैः समानवः वर्तुलैश्च तथैश्वर्यं पुष्टितैः सुभगो भवेत् स्निग्धैरुपच
येलाम्रैर्नखैर्भूपतयः स्मृतः रक्तैर्नखैस्तथैश्वर्यं धन्याः पद्मनखा नराः ५ ५६ इति हस्तपादन
खलक्षणं ३ धनीन स्तुरगंजंघी राजानो मृगजंघकाः दीर्घाभिस्थूलजंघाभिर्जायंते ध्वानगामि
नः सिंहव्याघ्रसमा जंघा धनकीर्तिप्रदायकाः रोमयुक्ता च या जंघा दारिद्र्यं सा परीक्षयेत् शृगा
लसमजंघानां लक्ष्मीस्तेषां न जायते मीनजंघाः स्वयं लक्ष्मीः संप्राप्नोति न संशयः स्थूलजंघाच
सूक्ष्मा च नित्यं गच्छति ये पार्थी दुष्टजंघा नरा ये च ते नरा भाग्यवर्जिताः काकजंघा नरा ये च ते षां रा हेरंब
ज्यं विनिर्दिशेत् एकरोमा भवेद्राजा द्विरोमा धनवान् भवेत् त्रिरोमा पंडितः प्रोक्तो बहुरोमा दरि
द्रता ६ ६१ इति जंघालक्षणं हंसहस्ती समागत्या पुरुषाश्च नराधिपाः वृषवाषभुकानां च ग ३

स्वेपत्नं चैवास्य रसोस्य भूम्यो नवाङ्गुष्ठं नतलाङ्गुष्ठपादः श्रियोभिलाषी पुरुषो न नम्रः ३७ इ
तिसामुद्रिके पुरुषलक्षणे मिश्रकाध्यायः प्रथमः अतःपरं प्रवक्ष्यामि देहावयवलक्षणं तत्र
पादतलं यथा यथा सर्वज्ञभाषितं अत्र स्वेदौ पृथुतलौ कमलोदरसंनिभौ ग्रहस्तांगुलिसंयुक्तौ नि
शाविरहितो नरः तत्वे सुदीर्घसंयुक्तैः सहितैश्चरणैस्तथा कूर्मोन्नतैश्च रक्तैश्च पुरुषास्तु नराधिपाः
सूर्पाकारैस्तथा भग्नैर्वक्रैः शुष्कैः शिरालकैः प्रस्वेदैः पांडुरक्षैश्च पुरुषास्तु सदुःखिताः अंगु
ष्ठो विपुलो येषां ते नरा दुःखभागिनः वृत्तैस्ताम्रैस्तथा रक्तैर्नखैराज्यं विनिर्दिशेत् पादौ समांसलौ रक्तौ
समौ सूक्ष्मौ सुशोभनौ समगुल्फौ स्वेदहीनौ स्निग्धावैश्वर्यसूचकौ यस्य प्रदेशिनी दीर्घांगुष्ठाद्व्य
तिक्रमेत् स्त्रीभोगं लभते सोपि पुरुषो नात्र संशयः भार्या वाम्रियते तस्य पुत्रो वियप्रथमोपि वा साचत
स्याभवेद्यस्य तं विद्यात्कलहप्रियं मध्यमायां तु दीर्घायां भार्याहानिर्विनिर्दिशेत् अनामिकायां दीर्घायां वि
द्याभोगी भवेन्नरः साचतस्याभवेद्यस्य तं विद्यात्कलहप्रियं साचतस्याभवेद्यस्य भार्याहानिं सदा तु यात्
कनिष्ठिकायां दीर्घायां स्वर्णभोगी भवेन्नरः साचतस्याभवेद्यस्य तं विद्यात्सारदारिद्र्यं ११ यस्य प्रदेशिनी
स्थूला तन्तथैव कनिष्ठिका बालस्य म्रियते माता समुद्रवचनं यथा अंगुष्ठाभिस्ताभिरंगुलीभिस्तु मानवः



निर्भोगवतां भवेत् जलोर्मिसदृशा यासां काकोलूकसमागतिः इत्यादीनि विहीनां च दुःखशोकभयं
करी श्वानोष्ट्रमहिषाणां च खरसूकरयोस्तथा गतिर्येषां समाख्याता ते नरा भाग्यवर्जिताः २ ६४
इतिगतिलक्षणं ५ दीर्घजानुलभेद्दुंधदशारिद्र्यं तालजानुकाः विषमे दुःखिता नित्यं निर्मांसेस्तु
प्रवासिकः अनपत्योल्पजानुश्च प्रश्नाशायुः स्निग्धजानुकः दुर्भगः स्थूलजानुश्च पीनजानुरभाग्य
वान् दंतोघं -- इसिनो नरः सर्वगुणान्वितः ऊरुभ्यां विरलाभ्यां च नरः स्यात्स्त्रीप्रवल्लभः स्थू
लाग्रा मध्यनिम्ना च जंघा याध्वानगामिनः २ ६७ इतिजानुलक्षणं ६ दक्षिणावर्तलिंगे
न स नरः पुत्रभाग्भवेत् वामावर्तेन लिंगेन नरः कन्याप्रजायते स्थूलविदीर्घलिंगश्च दीर्घेणापि
दारिद्र्यता रूक्षेण वर्तुलेनेन नराः स्युर्दुःखजीविनः ताम्रवर्णमणिर्यस्य समरेखाविराजते सुभगो
धनवांश्चैव नरो भवति नित्यशः सुवर्णरजतप्रख्यैर्मणिभिर्मौक्तिकसंनिभैः प्रवालस्निग्धमणिना
पार्थिवा जायते नरः पांडुरैर्मलिनैर्रूक्षैर्मणिभिस्त्वधमा नराः धारैका मूत्रयस्य स्मिन्दक्षिणाव
र्तिनी यदि गंधश्चमीनमधुनो यदि वीर्यं तदा नृपः एकधारेअलिंगेन नरो भवति पार्थिवः द्विधा
रेधनवंतश्च वक्रधारा दरिद्रता द्विधारं पतते मूत्रं स्निग्धशब्दविवर्जितं स्त्रीभोगं लभते सोरव्यं

 सनरोभाग्यवान्भवेत् मीनगंधेनशुक्रेण धनवान्पुत्रवान्भवेत् हविर्गंधेनशुक्रेण धनसंचयकारकः
 मधुगंधेनशुक्रेण नरस्त्रीजनवल्लभः पद्मगंधेभवेद्भूपो मद्यगंधेनपार्थिवः लाक्षागंधोभवेद्यस्तु मांस
गंधेनतस्करः असनीचवसागंधो मेदगंधेनदुःखितः कटुगंधेनशुक्रेणपुरुषोदुर्भगोभवेत् क्षार
गंधेनशुक्रेणतुंसोदारिद्र्यभागिनः पयोवर्णश्चशुक्रस्य नरोभवतिपार्थिवः श्यामवर्णेनशुक्रेणन
रोभोगीसदाभवेत् समपादोपविष्टस्य भूमिंस्पृशतिमेहनं सभवेद्दुःखितोनित्यंदारिद्र्येणचपीडितः
समपादोपविष्टस्य गुल्फौस्पृशतिमेहनं ईश्वरंतंविजानीयात्सुखिनंभोगभागिनं सिंहव्याघ्रासनं
यस्यन्हस्वंभवतिमेहनं भोगवान्सुखवित्तिश्चसत्यातुरगमेहनः प्रवालस्निग्धरक्तेनशोणितंयस्यदेहि
नः राजानंतंविजानीयादेकछत्रमहाबलं अलक्तकसदृशंचैव आर्क्तंयस्यशोणितं धनवान्भोगवांश्चैव
सनरःपरिकीर्तितः पद्मपत्रनिभंयस्यदेहेभवतिशोणितं जनयेद्बहुधाकन्यादुःखितश्चसदाभवेत्
गोमायुसदृशंयस्यखरोष्ट्रमहिषस्यच सभवेद्दुःखितोनित्यंदारिद्र्येणचपीडितः समपादोपविष्टस्य 
धनहीनोनसंशयः विस्तीर्णंमांसलंस्निग्धं अस्थिपुंसांप्रशस्यते कृशंरुक्षंचनिर्मांसं येषामस्थिनतेशु 
भाः २१ ८८ इतिसामुद्रिकेलिंगवीर्यरुधिरअस्थिलक्षणोसप्तमोध्यायः ७ विस्तीर्णाचकटि



स्निग्धात्तुभासुंसांप्रशस्यते निर्मांसोचकटिवृत्तिनेनरादुःखभागिनः सिंहव्याघ्रसमायेषांकटिस्ते
इंद्रनायकाः रुक्षवानरतुल्याचकटिर्येषांनतेशुभाः २ ९० इतिकटिलक्षणं ८ मृगोदरोनरो
धन्योमयूरोदरएवच मंडूकसदृशोयस्तुसभवेत्पार्थिवोनरः व्याघ्रोदरोगजपतिर्नरःसिंहोदरोभ
वेत् मंडूकउदरोयस्तुधनधान्यसमृद्धिमान् २ ९२ इत्युदरलक्षणं मांसलौसरलौवृत्तौपार्श्वौ
यस्यसुशोभनौ अश्वश्यामसमःपृष्ठःशोभनोरेनेनायकाः वर्तुलावातिगंभीरानाभिःपुंसांप्रश
स्यते उत्तानाविरलानाभिःसदादुःखप्रदायिनी २ ९४ इतिपार्श्वपृष्ठिनाभिलक्षणं ७० उन्न
तोपचितायेषांप्रथमाःस्निग्धाःपयोधराः पुरुषाधनिनःशूराभोगवंतश्चकर्मभिः ।विस्तीर्णं
हृदयंयेषांमांसलोपचितंसमं शतायुस्तंविजानीयाद्बहुभोज्यंमहाधनं सिंहपृष्ठोनरोयस्तुधनि
नश्चेतिनिर्दिशेत् कूर्मपृष्ठोनरोराजाधनसौभाग्यभागिनः प्रलंबबाहुर्विज्ञेयोनरःसर्वगुणान्वि
तः ह्रस्वबाहुर्भवेद्दासःपरकर्मकरस्मृतः वामावर्तोभुजायेतुदीर्घयुग्माभुजाश्चये संपूर्णाबाहवो
येषांराजानस्तान्विनिर्दिशेत् यस्यमीनसमारेखाकर्मसिद्धिस्तुजायते धनाढ्यःसतुविज्ञेयोबहु
पुत्रोनसंशयः तुलावामथवावज्रंकरमध्येतुदृश्यते वाणिज्यंसिध्यतेतस्यपुरुषस्यनसंशयः ७

सामु० पद्मं वा यदि वा शंखं कोष्ठागारं तु दृश्यते पुरुषस्य करे यस्य ईश्वरः स तु कथ्यते चक्राकारा ध्वजाकारा
५ खड्गाकारा च दृश्यते सर्वविद्याप्रधानोयं बुद्धिमान् संभवेन्नरः भूलं पाणौ भवेद्यस्य धनवान् संभवेन्न
रः यज्ञं धर्मं च दानं च द्विजदेवैः प्रपूज्यते शक्तितोमरबाणाश्च यस्य हस्ततले भवेत् रथो वाप्यथवा
छत्रं राजानं तं विनिर्दिशेत् यस्य पाणितले रेखा दृश्यते चांकुशाकृतिः राजानं तं विजानीयात् बहुवित्तं महाधि
पं श्रीवत्सं वज्रचक्राब्जमत्स्यकोदंडदंडवत् यस्य पाणितले रेखा संभवेच्च नराधिपः मत्स्यैः शतं विजा
नीयात् मकरैश्च सहस्रकं शंखैः कोटिं विजानीयात् सद्मैः कोटिसहस्रकं यस्य पाणितले रेखा कनिष्ठाम्
लसंस्थिता ऊर्ध्वं याति प्रदेशिन्यां शतायुर्भवते नरः द्वितीया धनरेखा च तृतीया कुलवर्द्धिनी यदि पूर्णा
तदा पूर्णा यदि छिन्ना तु छेदितं यस्योर्ध्वं मणिबंधोत्थरेखा वा नरगामिनी स च वरत्न राज्यश्रीदायिका
स्थानसंशयः अंगुलं सा विसद्याति स भूतो नृपतिसत्तमं सोवतर्जनिको प्राप्ता तेसाम्राज्यमुत्तमं सेनाप
तिर्धनीशस्तं मध्यमायां गता तथा अनामिकां पुनः श्रेष्ठा धनवान् संभवेन्नरः सुखिनं सुभगं चापि संप्राप्ता हरेः
साकनिष्ठिकां स करोति सत्यमेतायद्यछिन्ना सुवर्णगा स्तुर्याबंत्वोन रे रेखा मणिजीवीनरे खयोः सह ५
दरगणश्लाघ्या ज्ञातव्यः पाणिपल्लवे २१ मध्येया वन्धिता रेखा कालनिष्ठा जीवरेखयोः तावतोमहिलो



त्तस्यस्त्रियः स्त्राव्यं मिताथवा अंगुष्ठोदरमध्यस्थो यवो यस्य विराजते उत्पन्नभक्षभोगी च स नरः सु
खमेधते २३ ११७ इति करतलरेखालक्षणं १२ ग्रीवा तिवर्तुला यस्य पूर्णकुंभसमा भवेत् पार्थिवः
स तु विज्ञेयो धनधान्यसमाकुलः दीर्घग्रीवा शशग्रीवा - - - - थवा पुनः शुष्कग्रीवा च कृष्णा च
ते सर्वे ये विवर्जिताः २ ११९ इति ग्रीवालक्षणं वृषस्कंधा गजस्कंधा कदलीस्कंध मेव च सर्वे ते पा
र्थिवा ज्ञेया महाभोगा महाधनाः १ १२० इति स्कंधलक्षणं १४ चंद्रबिंबोपमं वक्त्रं धर्मशीलः सदा
भवेत् मृगमूषकवक्त्राश्च ते नरा भाग्यवर्जिताः करालदीनवक्त्राश्च धनहीनाः प्रकीर्तिताः हयव
क्त्रा नरा ये तु दुःखदारिद्र्यभागिनः २ १२२ इति मुखलक्षणं १५ यस्य गात्रो लोहितं पूर्णीय ध्याप
त्रसमप्रभौ भोगवांस्तु नरो ज्ञेयः सर्वविद्याधरः स्मृतः । हंसिन्याः प्रगजेन्द्राणां कपोलौ सदृशौ यदि
कृषिभागी भवन्ति स्म बहुपुत्रश्च जायते रक्ताधरो नृपो ज्ञेयो वक्रोष्ठो यः स दुःखितः स्थूलाभ्याम
धराभ्यां च नरा अत्यंतदुःखिताः कुंदपुष्पप्रतीकाशैर्दंतैर्भूपतयः स्मृताः रूक्षा वा नरदंताश्च नि
त्यं ते क्षुत्पीडिताः हस्तिदंताः खरदंता नास्ति दंता गुणान्विताः करालैर्विकलैः रूक्षैर्दशनैर्दुःखजीवि
नः द्वात्रिंशद्दशनो राजा एकत्रिंशच्च भोगवान् त्रिंशच्चैव नरो दुःखं सुखदुःखस्य भोगिनः ६ एको

सामु० नत्रिंशद्भिर्दंतैर्नरास्युर्दुःखजीविनः लोकदंतातिदंताश्च श्यामदंताश्च ये नराः मूषकैः समदंताश्च
ते पापाः परिकीर्तिताः ८ १२५ इति दंतलक्षणं १८ कृष्णा जिह्वा भवेद्यस्य स नरो दुःखभाग्भवेत्
६ श्यामलायां च जिह्वायां स भवेत्पापकारकः स्थूलजिह्वा तथा रूक्षा ते नरा अनृतभाषिणः श्वेतजि
ह्वा नरा ये च शौचाचारविवर्जिताः पद्मपत्रसमानास्तु भोगवान्मिष्टभोजन रक्तजिह्वा भवेद्यस्य
विद्यालक्ष्मीसमाप्नुयात् पद्मपत्रसमा जिह्वा अतिसूक्ष्मातिशोभना सर्वविद्याप्रदानस्य संभ
वंति नरोत्तमः कृष्णतालुसमा ये च भवंति कुलनाशकाः पद्मपत्रसमं तालु स नरो भूपतिर्भवेत्
आरक्तं चैव मृदुलं शोभनं यस्य तालुकं स सुखभागी स विज्ञेयः पीततालुनराधिपः श्वेततालु नरा ये
च धनवंतो भवंति ते रक्ततालु नरा ये च धनभोगो भवंति ते स च भोगी नरो ह्येते यो समुद्रवचनं यथा ७
१२५ इति जिह्वातालुलक्षणं १७ हंसस्वरेण नरो धन्यो मेघगंभीरवार्धिवः मृगांकतुस्वरो यस्य भो
गवांल्लु नरेश्वरः क्रौंचस्वराश्च राजानो भाग्यवंतो महाधनाः खरकाकस्वरा ये च क्षीणाभिन्नरवाश्च हंसंव
ये सूक्ष्मरवाश्च ये केचित्सर्वे ते परकर्मकाः हस्तिनासासमा ये च पीननासाश्च ये श्वराः दीर्घनासाश्च ६
ये मर्त्याः सर्वे ते जननायकाः पार्थिवाः शुकनासाश्च भोगिनस्ते न संशयः ४ ह्रस्वनासा नरा ये च